# ॥ રમણસહસ્રનામસ્તોત્રમ્ ॥

.. Shri Ramanamaharshi Sahasranama Stotra ..

sanskritdocuments.org

August 20, 2017

# .. Shri Ramanamaharshi Sahasranama Stotra ..

## ॥ રમણસહસ્રનામસ્તોત્રમ્ ॥

## Sanskrit Document Information

Text title : ramaNasahasranAmastotram

File name : ramaNasahasranAmastotram.itx

Category : sahasranAma, misc, jagadIsha-shAstrI

Location : doc_deities_misc

Author : Jagadisha Sastri

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Sunder Hattangadi sunderh at hotmail.com

Proofread by : Sunder Hattangadi sunderh at hotmail.com

Source : Ramanashram Publication www.sriramanamaharshi.org

Acknowledge-Permission: Sri V.S. Ramanan, President, Sri Ramanasramam sriramanamaharshi.org

Latest update : January 9, 2015

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ રમણસહસ્રનામસ્તોત્રમ્ ॥

॥ શ્રીઃ ॥

॥ શ્રીરમણસહસ્રનામસ્તોત્રપ્રારમ્ભઃ ॥

દેવ્યુવાચ ।
ભગવન્સર્વશાસ્ત્રાર્થપરિજ્ઞાનવતાં વર ।
અરુણેશસ્ય માહાત્મ્યં ત્વત્તો વિસ્તરશઃ શ્રુતમ્ ॥ ૧॥

તન્નામ્નામપિ સાહસ્રં સર્વપાપહરં નૃણામ્ ।
અરુણેશાવતારસ્ય રમણસ્ય મહાત્મનઃ ॥ ૨॥

ઇદાનીં શ્રોતુમિચ્છામિ તસ્ય નામસહસ્રકમ્ ।
યસ્ય સઙ્કીર્તનાન્મર્ત્યો વિમુક્તિં વિન્દતે ધ્રુવમ્ ॥ ૩॥

ત્વન્તુ સર્વં વિજાનાસિ નાન્યસ્ત્વત્તોઽસ્ય વેદિતા ।
તસ્માત્કારુણ્યતો મહ્યં ભક્તિમત્યૈ વિશેષતઃ ॥ ૪॥

નામ્નાં સહસ્રં દિવ્યાનાં રમણસ્ય મુનીશિતુઃ ।
રહસ્યમપિ વક્તવ્યં ત્વયા ગૌતમ સુવ્રત ॥ ૫॥

ગૌતમ ઉવાચ ।
સાધુ સાધુ મહાભાગે પ્રશ્ન એષ જગદ્ધિતઃ ।
વક્ષ્યે તચ્છ્રદ્ધયોપેતા સાવધાનમનાઃ શૃણુ ॥ ૬॥

જ્ઞાનં વેદાન્તસઞ્જાતં સાક્ષાન્મોક્ષસ્ય સાધનમ્ ।
કર્મોપાસ્ત્યાદિ તદ્ભિન્નં જ્ઞાનદ્વારૈવ મુક્તિદમ્ ॥ ૭॥

નિષ્કામકર્મશુદ્ધાનાં વિવેકાદિમતાં નૃણામ્ ।
જાયતે તચ્ચ વિજ્ઞાનં પ્રસાદાદેવ સદ્ગુરોઃ ॥ ૮॥

જ્ઞાનસાધનનિષ્ઠત્વં જ્ઞાનાભ્યાસં વિદુર્બુધાઃ ।
તારતમ્યેન ભિદ્યન્તે જ્ઞાનાભ્યાસાધિકારિણઃ ॥ ૯॥

વિચારમાત્રનિષ્ઠસ્ય મુખ્યા જ્ઞાનાધિકારિતા ।
વિચારી દુર્લભો લોકે વિચારો દુષ્કરો યતઃ ॥ ૧૦॥

મમુક્ષવો નરાસ્સર્વે જ્ઞાનાભ્યાસેઽધિકારિણઃ ।
સ્ત્રીશૂદ્રાણાં તથાન્યેષાં નાધિકારોવિગર્હિતઃ ॥ ૧૧॥

દેશભાષાન્તરેણાપિ તેષાં સોઽપ્યુપકારકઃ ।
જ્ઞાનસ્ય ચ વિચારોઽયં સન્નિકૃષ્ટં હિ સાધનમ્ ॥ ૧૨॥

વિચારભિન્નમાર્ગશ્ચ ન સાક્ષાજ્જ્ઞાનસિદ્ધયે ।
વિચારજનનદ્વારેત્યાહુર્વેદાન્તવેદિનઃ ॥ ૧૩॥

યોગોપાસ્ત્યાદયોઽપ્યન્યે સન્તિ વિજ્ઞાનહેતવઃ ।
તદાલમ્બો ભવત્યેવ વિચારાનધિકારિણામ્ ॥ ૧૪॥

યોગોપાસ્ત્યાદ્યશક્તાનાં જપસ્ત્યુત્યાદિકીર્તનમ્ ।
જ્ઞાનોપાયોભવત્યેવ જિજ્ઞાસાનુષ્ઠિતં યદિ ॥ ૧૫॥

તસ્માદયત્નતોજ્ઞાનં સર્વેષાં યેન હેતુના ।
તાદૃશં નામસાહસ્રં રમણસ્ય મહાત્મનઃ ॥ ૧૬॥

ત્વય પ્રીત્યૈવ વક્ષ્યામિ હિતાય જગતાં શૃણુ ।
નાભક્તાય પ્રદાતવ્યમિદં મોક્ષસુખપ્રદમ્ ॥ ૧૭॥

અસ્ય શ્રીરમણદિવ્યસહસ્રનામસ્તોત્રમહામન્ત્રસ્ય ।
ગૌતમો ઋષિઃ । અનુષ્ટુપ્છન્દઃ । શ્રીરમણપરમાત્માદેવતા ।
ઐં બીજમ્ । હ્રીં શક્તિઃ । શ્રીં કીલકમ્ ।
"શ્રી રમણાય નમઃ" ઇતિ મન્ત્રપ્રત્યેકવર્ણેન હૃદયાદિ ન્યાસઃ ।
ૐ ભૂર્ભુવસ્સ્વરોમિતિ દિગ્બન્ધઃ ।
ધ્યાનમ્ ।
ધ્યાયેચ્છારદચન્દ્રસુન્દરમુખં તામ્રારવિન્દેક્ષણં
ભક્તાભીષ્ટવરાભયપ્રદકરં કૌપીનમાત્રોજ્જ્વલમ્ ।
સ્વાત્માનન્દરસાનુભૂતિવિવશં સર્વાનવદ્યાઙ્ગકં
શ્રીમન્તં રમણેશ્વરં ગુરુવરં યોગાસનાધ્યાસિતમ્ ॥

અરુણજલજનેત્રં મુગ્ધમન્દસ્મિતાસ્યં
    તરુણતપનભાસં પૂર્ણબોધપ્રસાદમ્ ।
અરુણશિખરિસાનુપ્રાઙ્ગણે સઞ્ચરન્તં
    રમણમરુણમૂર્તિં ચિન્તયેદિષ્ટસિદ્ધ્યૈ ॥

॥ ૐ ॥

અરુણેશમહાશક્તિનિપાતપ્રતિબોધિતઃ ।
અચિન્ત્યપરનિર્વાણસ્થિતિરવ્યક્તશક્તિકઃ ॥ ૧॥

અનભ્યાસશ્રમાવાપ્તસમસ્તનિગમાગમઃ ।
અરુણાચલનાથીયપઞ્ચરત્નપ્રકાશકઃ ॥ ૨॥

અનાહતાન્યહૃદયસ્થાનબોધનપણ્ડિતઃ ।
અકારાદિક્ષકારાન્તમાતૃકામન્ત્રમાલિકઃ ॥ ૩॥

અન્તર્ગતમહાશક્તિરણિમાદિગુણાન્વિતઃ ।
અભ્યાસાતિશયજ્ઞાત અત્યાશ્ચર્યચરિત્રકઃ ॥ ૪॥

અતિવર્ણાશ્રમાચારોઽચિન્ત્યશક્તિરમોઘદૃક્ ।
અઙ્ગાવન્ત્યાદિદેશીયમુમુક્ષુજનતાશ્રયઃ ॥ ૫॥

અન્તર્મુખોઽન્તરારામ અન્તર્યામ્યહમર્થદૃક્ ।
અહમર્થૈકલક્ષ્યાર્થ અરુણાદ્રિમયોઽરુણઃ ॥ ૬॥

અપીતામ્બાઙ્ગનિર્માલ્યપયઃપાનૈકજીવિતઃ ।
અધ્યાત્મયોગનિલય અદીનાત્માઽઘમર્ષણઃ ॥ ૭॥

અકાયો ભક્તાકાયસ્થઃ કાલચક્રપ્રવર્તકઃ ।
અક્ષિપેયામૃતામ્ભોધિરાહૂયૈશ્વર્યદાયકઃ ॥ ૮॥

આજાનુબાહુરક્ષોભ્ય આત્મવાનનસૂયકઃ ।
આવર્તક્ષેત્રસઞ્જાત આર્તરક્ષણતત્પરઃ ॥ ૯॥

ઇતિહાસપુરાણજ્ઞ ઇષ્ટાપૂર્તફલપ્રદઃ ।
ઇડાપિઙ્ગલિકામધ્ય-સુષુમ્નાગ્રન્થિભેદકઃ ॥ ૧૦॥

ઇડાપિઙ્ગલિકામધ્ય-સુષુમ્નામધ્યભાસુરઃ ।
ઇષ્ટાર્થદાનનિપુણ ઇન્દ્રભોગવિરક્તધીઃ ॥ ૧૧॥

ઈશાન ઈષણાહીનઃ ઇતિબાધાભયાપહઃ ।
ઉપાસ્યમૂર્તિરુત્સાહસમ્પન્ન ઉરુવિક્રમઃ ॥ ૧૨॥

ઉદાસીનવદાસીન ઉત્તમજ્ઞાનદેશિકઃ । નામ ૫૦
ઊર્ધ્વરેતા ઊર્ધ્વગતિ રુટજસ્થ ઉદારધીઃ ॥ ૧૩॥

ઋષીઋષિગણસ્તુત્યો ઋજુબુદ્ધી ઋજુપ્રિયઃ ।

ઋતમ્ભર ઋતપ્રજ્ઞો ઋજુમાર્ગપ્રદર્શકઃ ॥ ૧૪॥

એવમિત્યવિનિર્ણેયઃ એનઃકૂટવિનાશનઃ ।
ઐશ્વર્યદાનનિપુણ ઔદાર્યગુણમણ્ડિતઃ ॥ ૧૫॥

ઓઙ્કારપદલક્ષ્યાર્થ ઔપમ્યપરિવર્જિતઃ ।
કટાક્ષસ્યન્દિકરુણઃ કટિબદ્ધાલમલ્લકઃ ॥ ૧૬॥

કમનીયચરિત્રાઢ્યઃ કર્મવિત્કવિપુઙ્ગવઃ ।
કર્માકર્મવિભાગજ્ઞઃ કર્મલેપવિવર્જિતઃ ॥ ૧૭॥

કલિદોષહરઃ કમ્રઃ કર્મયોગપ્રવર્તકઃ ।
કર્મન્દિપ્રવરઃ કલ્યઃ કલ્યાણગુણમણ્ડિતઃ ॥ ૧૮॥

કાન્તિપત્તનસન્દૃષ્ટારુણજ્યોતિઃપ્રહર્ષિતઃ ।
કામહન્તાકાન્તમૂર્તિઃ કાલાત્માકાલસૂત્રહૃત્ ॥ ૧૯॥

કાઙ્ક્ષાહીનઃ કાલકાઙ્ક્ષી કાશીવાસફલપ્રદઃ ।
કાશ્મીરદેશ્યસેવ્યાઙ્ઘ્રિર્નેપાલીયસમર્ચિતઃ ॥ ૨૦॥

કામકારનિરાકર્તા કૃતકૃત્યત્વકારકઃ ।
કાવ્યકણ્ઠસુધીદૃષ્ટકાર્તિકેયસ્વરૂપધૃક્ ॥ ૨૧॥

કિઙ્કરીકૃતભૂપાલઃ કીર્તિમાન્કીર્તિવર્દ્ધનઃ ।
કુમારઃ કુતલામોદઃ કુકુટુમ્બી કુલોદ્ભતઃ ॥ ૨૨॥ નામ ૧૦૦
કુષ્ઠાપસ્મારરોગઘ્નઃ કુસુમારામનિષ્ઠિતઃ ।
કૃપાલુઃ કૃપણાલમ્બઃ કૃશાનુસદૃશઃ કૃશઃ ॥ ૨૩॥

કેરલાન્ધ્રાદિભાષાજ્ઞઃ કેરલાન્ધ્રજનેડિતઃ ।
કૈવલ્યપદનિશ્શ્રેણિઃ કૈવલ્યસુખદાયકઃ ॥ ૨૪॥

કોઽહં નાહં સોઽહમિતિ સ્વાત્માન્વેષણમાર્ગદૃક્ ।
કોઽહંવિમર્શબ્રહ્માસ્ત્ર-નાશિતાશેષવિભ્રમઃ ॥ ૨૫॥

કોશાલયપ્રતિષ્ઠાતા કોશવાન્કોશવીક્ષિતા ।
ક્ષમાવાન્ક્ષિપ્રસન્તુષ્ટઃ ક્ષપિતાશેષકલ્મષઃ ॥ ૨૬॥

ક્ષતકર્મા ક્ષતાવિદ્યઃ ક્ષીણભક્તજનાવનઃ ।
ક્ષામનાશી ક્ષુધાહીનઃ ક્ષુદ્રઘ્નઃ ક્ષિતિમણ્ડનમ્ ॥ ૨૭॥

ક્ષેત્રજ્ઞઃ ક્ષેમદઃ ક્ષેમઃ ક્ષેમાર્થિજનવન્દિતઃ ।
ક્ષેત્રાટનપરિશ્રાન્તભક્તક્ષિપ્રપ્રસાદનઃ ॥ ૨૮॥

ક્ષ્મ્રૌંમન્ત્રબીજતત્ત્વજ્ઞઃ ક્ષેત્રાજીવફલપ્રદઃ ।
ગમ્ભીરો ગર્વિતોગર્વવિહીનો ગર્વનાશનઃ ॥ ૨૯॥

ગદ્યપદ્યપ્રિયોગમ્યો ગાયત્રીમન્ત્રબોધિતઃ ।
ગિરિશો ગીષ્પતિર્ગુણ્યો ગુણાતીતો ગુણાકરઃ ॥ ૩૦॥

ગૃહીગૃહવિનિર્મુક્તો ગ્રહાતિગ્રહસઞ્જયી ।
ગીતોપદેશસારાદિગ્રન્થકૃદ્ ગ્રન્થિભેદકઃ ॥ ૩૧॥ નામ ૧૫૦
ગુરુમૂર્તતપોનિષ્ઠઃ નૈસર્ગિકસુહૃદ્વરઃ ।
ગૃહિમુક્ત્યધિકારિત્વ વ્યવસ્થાપનતત્પરઃ ॥ ૩૨॥

ગોવિન્દો ગોકુલત્રાતા ગોષ્ઠીવાન્ગોધનાન્વિતઃ ।
ચરાચરહિતશ્ચક્ષુરુત્સવશ્ચતુરશ્ચલઃ ॥ ૩૩॥

ચતુર્વર્ગચતુર્ભદ્રપ્રદશ્ચરમદેહભૃત્ ।
ચાણ્ડાલચટકશ્વાઽહિ-કિટિકીશહિતઙ્કરઃ ॥ ૩૪॥

ચિત્તાનુવર્તી ચિન્મુદ્રી ચિન્મયશ્ચિત્તનાશકઃ ।
ચિરન્તનશ્ચિદાકાશશ્ચિન્તાહીનશ્ચિદૂર્જિતઃ ॥ ૩૫॥

ચોરહા ચોરદૃક્ ચોરચપેટાઘાતનન્દિતઃ ।
છલચ્છદ્મવચોહીનશ્શત્રુજિચ્છત્રુતાપનઃ ॥ ૩૬॥

છન્નાકારશ્છાન્દસેડ્યચ્છિન્નકર્માદિ બન્ધનઃ ।
છિન્નદ્વૈધશ્છિન્નમોહશ્છિન્નહૃચ્છિન્નકલ્મષઃ ॥ ૩૭॥

જગદ્ગુરુર્જગત્પ્રાણો જગદીશો જગત્પ્રિયઃ ।
જયન્તીજોજન્મહીનો જયદો જનમોહનઃ ॥ ૩૮॥

જાગ્રત્સ્વપ્નસુષુપ્ત્યાદિસાક્ષી જાડ્યવિનાશકઃ ।
જાતિવર્ણભિદાશૂન્યો જિતાત્મા જિતભૂતકઃ ॥ ૩૯॥

જિતેન્દ્રિયો જિતપ્રાણો જિતાન્તશ્શત્રુસઞ્ચયઃ । નામ ૨૦૦
જીવબ્રહ્મૈક્યવિજ્જીવન્મુક્તો જીવત્વનાશકઃ ॥ ૪૦॥

જ્યોતિર્લિઙ્ગમયજ્યોતિસ્સમલોષ્ટાશ્મકાઞ્ચનઃ ।

જેતા જ્યાયાજ્જ્ઞાનમૂર્તિર્જ્ઞાની જ્ઞાનમહાનિધિઃ ॥ ૪૧॥

જ્ઞાનજ્ઞાતૃજ્ઞેયરૂપત્રિપુટીભાવનોજ્ઝિતઃ ।
જ્ઞાતસર્વાગમો જ્ઞાનગમ્યો જ્ઞાતેયસન્નુતઃ ॥ ૪૨॥

જ્ઞાનવિજ્ઞાનતૃપ્તાત્મા જ્ઞાનસઞ્છિન્નસંશયઃ ।
જ્ઞાનાગ્નિદગ્ધકર્મા ચ જ્ઞાનોપાયપ્રદર્શકઃ ॥ ૪૩॥

જ્ઞાનયજ્ઞવિધિપ્રીતો જ્ઞાનાવસ્થિતમાનસઃ ।
જ્ઞાતાઽજ્ઞાતાન્યચિન્માત્રો જ્ઞાનવૃદ્ધોપલાલિતઃ ॥ ૪૪॥

તત્ત્વજ્ઞસ્તત્ત્વવિન્નેતા તત્ત્વમસ્યાદિલક્ષિતઃ ।
તત્ત્વભાષણસન્તુષ્ટસ્તત્ત્વબોધકદેશિકઃ ॥ ૪૫॥

તત્પદાર્થૈકસંલીનસ્તત્ત્વાન્વેષણ તત્પરઃ ।
તપનસ્તપનીયાઙ્ગસ્તમસ્સન્તાપચન્દ્રમાઃ ॥ ૪૬॥

તપસ્વી તાપસારાધ્યસ્તપઃ ક્લિષ્ટતનૂદ્વહઃ ।
તપસ્તત્ત્વાર્થસારજ્ઞસ્તપોમૂર્તિસ્તપોમયઃ ॥ ૪૭॥

તપોબલસમાકૃષ્ટભક્તસઙ્ઘસમાવૃતઃ ।
તાપત્રયાગ્નિસન્તપ્તજનસઞ્જીવનામૃતમ્ ॥ ૪૮॥

તાતાદેશાપ્તશોણાદ્રિસ્તાતારુણમહેશ્વરઃ ।
તાતાન્તિકસમાગન્તા તાતાન્વેષણતત્પરઃ ॥ ૪૯॥

તિતિક્ષુસ્તીર્થવિત્તીર્થં તુરીયસ્તુષ્ટમાનસઃ । નામ ૨૫૦
તુલ્યનિન્દાસ્તુતિસ્તૂષ્ણીંશીલસ્તૃષ્ણાવિવર્જિતઃ ॥ ૫૦॥

તેજસ્વીત્યક્તવિષયસ્ત્રયીભાવાર્થકોવિદઃ ।
ત્રિદિવેશમુખોપાસ્યસ્ત્રિવર્ગસ્ત્રિગુણાત્મકઃ ॥ ૫૧॥

ત્રૈલોક્યબુધસમ્પૂજ્યસ્ત્રૈલોક્યગ્રાસબૃંહિતઃ ।
ત્રૈલોક્યસૃષ્ટિસ્થિતિકૃત્ ત્રૈગુણ્યવિષયોજ્ઝિતઃ ॥ ૫૨॥

ત્રૈગુણ્યવિષવેગઘ્નો દક્ષો દગ્ધવપુર્ધરઃ ।
દર્શનીયો દયામૂર્તિર્દક્ષિણાસ્યો દમાન્વિતઃ ॥ ૫૩॥

દણ્ડધૃક્ દણ્ડનીતિસ્થો દક્ષિણો દમ્ભવર્જિતઃ ।
દહરાકાશમધ્યસ્થ ચિદાકાશપ્રતિષ્ઠિતઃ ॥ ૫૪॥

દશદિક્પાલસમ્પૂજ્યો દશદિગ્વ્યાપિસદ્યશાઃ ।
દક્ષિણદ્વીપવિખ્યાતો દાક્ષિણાત્યકલાકવિઃ ॥ ૫૫॥

દારિદ્ર્યધ્વંસકો દાન્તો દારિતક્લેશસન્તતિઃ ।
દાસીદાસભરો દિવ્યો દિષ્ટ્યાબુદ્ધો દિગમ્બરઃ ॥ ૫૬॥

દીર્ઘદર્શી  દીપ્યમાનો દીનબન્ધુર્દૃગાત્મકઃ ।
દુર્વિગાહ્યો દુરાધર્ષો દુરાચારનિવર્તકઃ ॥ ૫૭॥

દૃગ્દૃશ્યભેદધીશૂન્યો દર્શનં દૃપ્તખણ્ડકઃ ।
દેવવન્દ્યો દેવતેશો દોષજ્ઞો દોષનાશનઃ ॥ ૫૮॥ નામ ૩૦૦
દ્વાદશાર્ણમનુધ્યેયો દ્વાદશાન્તસ્થલસ્થિતઃ ।
દૈવિકો દ્રાવિડો દ્વીપાન્તરવિખ્યાતવૈભવઃ ॥ ૫૯॥

દ્વિતીયાતિથિસમ્ભૂતો દ્વૈતભાવવિમુક્તધીઃ ।
દ્વૈતાદ્વૈતમતાતીતો દ્વૈતસન્તમસાપહઃ ॥ ૬૦॥

ધનદો ધર્મસૂક્ષ્મજ્ઞો ધર્મરાટ્ ધાર્મિકપ્રિયઃ ।
ધાતા ધાતૃસમશ્રીકો ધાતુશુદ્ધિવિધાયકઃ ॥ ૬૧॥

ધારણાશક્તિમાન્ધીરો ધુરીણો ધૃતિવર્દ્ધનઃ ।
ધીરોદાત્તગુણોપેતો ધ્યાનનિષ્ઠો ધ્રુવસ્મૃતિઃ ॥ ૬૨॥

નમજ્જનોદ્ધારણકૃન્નરવાહનસન્નિભઃ ।
નવનીતસમસ્વાન્તો નતસાધુજનાશ્રયઃ ॥ ૬૩॥

નરનારીગણોપેતો નગસાનુકૃતાશ્રમઃ ।
નમમેત્યવ્યયયુતો નવીનો નષ્ટમાનસઃ ॥ ૬૪॥

નયનાનન્દદો નમ્યો નામોચ્ચારણમુક્તિદઃ ।
નાગસ્વામ્યનુજો નાગસુન્દરજ્યેષ્ઠતાં ગતઃ ॥ ૬૫॥

નાદબિન્દુકલાભિજ્ઞો નાદબ્રહ્મપ્રતિષ્ઠિતઃ ।
નાદપ્રિયો નારદાદિપૂજ્યો નામવિવર્જિતઃ ॥ ૬૬॥

નામી નામજપપ્રીતો નાસ્તિકત્વવિઘાતકૃત્ ।
નાસાગ્રણ્યસ્તદૃઙ્ નામબ્રહ્માતીતો નિરઞ્જનઃ ॥ ૬૭॥

નિરઞ્જનાશ્રયો નિત્યતૃપ્તો નિશ્શ્રેયસપ્રદઃ । નામ ૩૫૦
નિર્યત્નસિદ્ધનિત્ય શ્રીર્નિત્યસિદ્ધસ્વરૂપદૃક્ ॥ ૬૮॥

નિર્મમો નિરહઙ્કારો નિરવદ્યો નિરાશ્રયઃ ।
નિત્યાનન્દો નિરાતઙ્કો નિષ્પ્રપઞ્ચો નિરામયઃ ॥ ૬૯॥

નિર્મલો નિશ્ચલો નિત્યો નિર્મોહો નિરુપાધિકઃ ।
નિસ્સઙ્ગો નિગમસ્તુત્યો નિરીહો નિરુપપ્લવઃ ॥ ૭૦॥

નિત્યશુદ્ધો નિત્યબુદ્ધો નિત્યમુક્તો નિરન્તરઃ ।
નિર્વિકારો નિર્ગુણાત્મા નિષ્પાપો નિષ્પરિગ્રહઃ ॥ ૭૧॥

નિર્ભવો નિસ્તુલો નિઘ્નો નિજાનન્દૈકનિર્ભરઃ ।
નિગ્રહાનુગ્રહસમો નિકૃતિજ્ઞો નિદાનવિત્ ॥ ૭૨॥

નિર્ગ્રન્થો નિર્નમસ્કારો નિસ્તુલિર્નિરયાપહઃ ।
નિર્વાસનો નિર્વ્યસનો નિર્યોગક્ષેમચિન્તનઃ ॥ ૭૩॥

નિર્બીજધ્યાનસંવેદ્યો નિર્વાદો નિશ્શિરોરુહઃ ।
પઞ્ચાક્ષરમનુધ્યેયઃ પઞ્ચપાતકનાશનઃ ॥ ૭૪॥

પઞ્ચસ્કન્ધીમતાભિજ્ઞઃ પઞ્ચકોશવિલક્ષણઃ ।
પઞ્ચાગ્નિવિદ્યામાર્ગજ્ઞઃ પઞ્ચકૃત્યપરાયણઃ ॥ ૭૫॥ નામ ૪૦૦
પઞ્ચવક્ત્રઃ પઞ્ચતપાઃ પઞ્ચતાકારણોદ્ધરઃ ।
પઞ્ચોપચારસમ્પૂજ્યઃ પઞ્ચભૂતવિમર્દનઃ ॥ ૭૬॥

પઞ્ચવિંશતિતત્ત્વાત્મા મહાપઞ્ચદશાક્ષરઃ ।
પરાશરકુલોદ્ભૂતઃ પણ્ડિતઃ પણ્ડિતપ્રિયઃ ॥ ૭૭॥

પરમેષ્ઠી પરેશાનઃ પરિપૂર્ણઃ પરાત્પરઃ ।
પરંજ્યોતિઃ પરંધામ પરમાત્મા પરાયણમ્ ॥ ૭૮॥

પતિવ્રતાભીષ્ટદાયી પર્યઙ્કસ્થઃ પરાર્થવિત્ ।
પવિત્રપાદઃ પાપારિઃ પરાર્થૈકપ્રયોજનઃ ॥ ૭૯॥

પાલીતીર્થતટોલ્લાસી પાશ્ચાત્યદ્વીપવિશ્રુતઃ ।
પિતા પિતૃહિતઃ પિત્તનાશકઃ પિતૃમોચકઃ ॥ ૮૦॥

પિતૃવ્યાન્વેષિત પીનઃ પાતાલેશાલયસ્થિતઃ ।

પુનર્વસૂદિતઃ પુણ્યઃ પુણ્યકૃત્પુરુષોત્તમઃ ॥ ૮૧॥

પુન્નાગતરુવત્ક્ષેત્રી પુણ્યાપુણ્યવિવર્જિતઃ ॥।

પૂતાત્મા પૃથુકપ્રીતઃ પૃથુદશ્ચ પુરોહિતઃ ॥ ૮૨॥

પ્રતિમાકૃતસાન્નિધ્યઃ પ્રતિગ્રહપરાઙ્મુખઃ ।
પ્રમાદિવત્સરોદ્ભૂતઃ પ્રકૃતિસ્થઃ પ્રમાણવિત્ ॥ ૮૩॥

પ્રતીકોપાસ્તિવિષયઃ પ્રત્યુત્તરવિચક્ષણઃ । નામ ૪૫૦
પ્રત્યક્ પ્રશાન્તઃ પ્રત્યક્ષઃ પ્રશ્રિતઃ પ્રતિભાનવાન્ ॥ ૮૪॥

પ્રદક્ષિણાપ્રીતમનાઃ પ્રવાલાદ્રિસમાશ્રયઃ ।
પ્રાચ્યપ્રતીચ્યદેશીય વિબુધાગ્રણ્યવન્દિતઃ ॥ ૮૫॥

પ્રસ્થાનભેદસમ્બોદ્ધ્યઃ પ્રાંશુઃ પ્રાણનિરોધકઃ ।
પ્રસૂતિદિનવૃદ્ધસ્ત્રી દર્શિતજ્યોતિરાકૃતિઃ ॥ ૮૬॥

પ્રાર્થિતાર્થપ્રદઃ પ્રાજ્ઞઃ પ્રાવારકનિગૂહિતઃ ।
પ્રાતસ્સ્મર્તવ્યચારિત્રઃ પ્રાપ્તપ્રાપ્તવ્યનિર્વૃતઃ ॥ ૮૭॥

પ્રયાણસ્મૃતિસમ્પ્રાપ્યઃ પ્રિયહીનઃ પ્રિયંવદઃ ।
પ્રેક્ષાવાન્પ્રેષ્યરહિતઃ ફલભૂતઃ ફલપ્રદઃ ॥ ૮૮॥

બહુશ્રુતો બહુમતો બહુપાકી બહુપ્રદઃ ।
બલવાન્બન્ધુમાન્બાલરૂપો બાલ્યવિચેષ્ટિતઃ ॥ ૮૯॥

બાલભાનુપ્રતીકાશો બાલસન્ન્યાસિશબ્દિતઃ ।
બ્રહ્મચર્યતપોયોગશ્રુતપ્રજ્ઞાસમન્વિતઃ ॥ ૯૦॥

બ્રહ્મણ્યો બ્રહ્મવિદ્બ્રહ્મ બ્રહ્મસાયુજ્યદાયકઃ ।
બ્રહ્માર્પિતમનોબુદ્ધિર્બ્રાહ્મણસ્વામિનામકઃ ॥ ૯૧॥

બ્રહ્માસનસ્થિતો બ્રહ્મસૂત્રવિદ્ભગવાન્ભવઃ ।
ભયકૃદ્ભયસંહર્તા ભવાદો ભક્તભાવિતઃ ॥ ૯૨॥ નામ ૫૦૦
ભારૂપો ભાવનાગ્રાહ્યો ભાવજ્ઞો ભાગ્યવર્દ્ધનઃ ।
ભારતીયમહાભાગ્યં ભારતખ્યાતિપોષકઃ ॥ ૯૩॥

ભારતોદ્ઘદ્જ્ઞાનદીપો ભાવનાભેદકૃન્તનઃ ।
ભિદાશૂન્યો ભિદાધ્વંસી ભાવુકો ભિક્ષુકેશ્વરઃ ॥ ૯૪॥

ભૂતિદો ભૂતિકૃદ્ભૂમિ નાથપૂર્ણાંશસમ્ભવઃ ।
ભૌમબ્રહ્મ ભ્રમધ્વંસી ભૂહૃત્ક્ષેત્રલક્ષિતઃ ॥ ૯૫॥

ભૂતિભૂષિતસર્વાઙ્ગો મઙ્ગલો મઙ્ગલપ્રદઃ ।
મનોબુદ્ધિરહઙ્કારઃ પ્રકૃતિશ્ચ પરઃ પુમાન્ ॥ ૯૬॥

મહાશક્તિર્મહાસિદ્ધિર્મહોદારો મહાદ્યુતિઃ ।
મહાકર્તા મહાભોક્તા મહાયોગી મહામતિઃ ॥ ૯૭॥

મહામાન્યો મહાભાગો મહાસેનમહોંશજઃ ।
મર્યાદાકૃન્મહાદેવો મહારૂપી મહાયશાઃ ॥ ૯૮॥

મહોદ્યમો મહોત્સાહો મમતાગ્રહપીડનઃ ।
મહામન્ત્રો મહાયન્ત્રો મહાવાક્યોપદેશકઃ ॥ ૯૯॥

મહાવાક્યાર્થતત્ત્વજ્ઞો મહામોહનિવારકઃ ।
માયાવી માનદો માની માતૃમુક્તિવિધાયકઃ ॥ ૧૦૦॥ નામ ૫૫૦
માનાવમાનસામ્યાત્મા માલૂરાધસ્તપસ્સ્થિતઃ ।
મધૂકદ્રુતલસ્થાયી માતૃમાન્માતૃભક્તિમાન્ ॥ ૧૦૧॥

માત્રાલયપ્રતિષ્ઠાતા માર્ગિતો માર્ગબાન્ધવઃ ।
માર્ગણીયો માર્ગદર્શી માર્ગશીર્ષકૃતોદયઃ ॥ ૧૦૨॥

માર્ગિતાત્મા માર્ગશૂન્યો મિતભુઙ્મિતસઞ્ચરઃ ।
મિતસ્વપ્નાવબોધશ્ચ મિથ્યાબાહ્યનિરીક્ષકઃ ॥ ૧૦૩॥

મુનિર્મુક્તો મુક્તિદાયી મેધાવી મેધ્યભોજનઃ ।
મૌનવ્યાખ્યાનકૃન્મૌની મૌનભાષાવિશારદઃ ॥ ૧૦૪॥

મૌનામૌનદ્વયાતીતો મૌનદો મૌનિષુ પ્રિયઃ ।
યજ્ઞકૃદ્યજ્ઞભુગ્યજ્ઞો યજમાનો યથાર્થવિત્ ॥ ૧૦૫॥

યતાત્મા યતિસમ્પૂજ્યો યતિપ્રાપ્યો યશસ્કરઃ ।
યમાદ્યષ્ટાઙ્ગયોગજ્ઞો યજુશ્શાખી યતીશ્વરઃ ॥ ૧૦૬॥

યવનાનુગ્રહકરો યક્ષો યમનિષૂદનઃ ।
યાત્રાવિરહિતો યાનાઽનારૂઢો યાજ્ઞિકપ્રિયઃ ॥ ૧૦૭॥

યાતનાનાશનો યાગ્ચહીનો યાચિતદાયકઃ । નામ ૬૦૦
યુક્તકૃદ્યુક્તભુગ્યુક્ત સ્વપ્નબોધો યુગાદિકૃત્ ॥ ૧૦૮॥

યોગીશો યોગપુરુષો યોગતત્ત્વવિવેચકઃ ।
યોગાસનો યોગભૂમિ સમારોહણસાધકઃ ॥ ૧૦૯॥

યોગિગમ્યો યોગફલં યોગભ્રષ્ટશુભપ્રદઃ ।
યોગપ્રશંસી યોગસ્થો યોગક્ષેમધુરન્ધરઃ ॥ ૧૧૦॥

રક્ષકો રમણો રમ્યો રમણીયાઙ્ગસંહતિઃ ।
રમેશક્લેશસન્દૃષ્ટજ્યોતિરક્લેશદર્શનઃ ॥ ૧૧૧॥

રજોપહો રજોમૂર્તી રસિકો રસશેવધિઃ ।
રહસ્યો રઞ્જનો રસ્યો રત્નગર્ભો રસોદયઃ ॥ ૧૧૨॥

રાજવિદ્યાગુરૂ રાજ વિદ્યાવિદ્રાજમાનિતઃ ।
રાજસાહારનિર્મુક્તો રાજસજ્ઞાનદૂરગઃ ॥ ૧૧૩॥

રાગદ્વેષવિનિર્મુક્તો રસાલાશ્રમકોકિલઃ ।
રામાભિરામો રાજશ્રીઃ રાજા રાજ્યહિતઙ્કરઃ ॥ ૧૧૪॥

રાજભોગપ્રદો રાષ્ટ્રભાષાવિદ્રાજવલ્લભઃ ।
રુદિતદ્વેષણો રુદ્રો લક્ષ્મીવાન્લક્ષ્મિવર્દ્ધનઃ ॥ ૧૧૫॥

લજ્જાલુર્લલિતો લબ્ધલબ્ધવ્યો લઘુસિદ્ધિદઃ । નામ ૬૫૦
લયવિલ્લબ્ધકામૌઘો લાભાલાભસમાશયઃ ॥ ૧૧૬॥

લયાધિષ્ઠાનતત્ત્વજ્ઞો લયપૂર્વસમાધિમાન્ ।
લાસ્યપ્રિયો લિઙ્ગરૂપી લિઙ્ગોત્થો લિઙ્ગવર્જિતઃ ॥ ૧૧૭॥

લિપિલેખચણો લોકશિક્ષકો લોકરક્ષકઃ ।
લોકાયતમતાભિજ્ઞો લોકવાર્તાવિવર્જિતઃ ॥ ૧૧૮॥

લોકોદાસીનભાવસ્થો લોકોત્તરગુણોત્તરઃ ।
લોકાધ્યક્ષો લોકપૂજ્યો લોકાસારત્વબોધકઃ ॥ ૧૧૯॥

લોકાકર્ષણશક્તાત્મશક્તિમત્કાન્તપર્વતઃ ।
લોકાનુત્સાદકો લોકપ્રમાણં લોકસઙ્ગ્રહી ॥ ૧૨૦॥

લોકબોધપ્રકાશાર્થ શોણોઘજ્જ્ઞાનભાસ્કરઃ ।

વરિષ્ઠો વરદો વક્તા વઙ્ગદેશ્યજનાશ્રયઃ ॥ ૧૨૧॥

વન્દારુજનમન્દારો વર્તમાનૈકકાલવિત્ ।
વનવાસરસાભિજ્ઞો વલિત્રયવિભૂષિતઃ ॥ ૧૨૨॥

વસુમાન્વસ્તુતત્ત્વજ્ઞો વન્દ્યો વત્સતરીપ્રિયઃ ।
વર્ણાશ્રમપરિત્રાતા વર્ણાશ્રમમતાતિગઃ ॥ ૧૨૩॥

વાક્યજ્ઞો વાક્યકુશલો વાઙ્મનોબુદ્ધ્યગોચરઃ ।
વાદ્યગીતપ્રિયો વાજશ્રવા વાપીપ્રતિષ્ઠકઃ ॥ ૧૨૪॥

વાહનાગારનિષ્ઠાવાન્વાજિમેધફલપ્રદઃ ।
વક્ષોદક્ષિણભાગસ્થ હૃદયસ્થાનદર્શકઃ ॥ ૧૨૫॥ નામ ૭૦૦
વચદ્ભૂમન્ત્રસંસેવ્યો વિચારૈકોપદેશકૃત્ ।
વિચારમાત્રનિરતો વિવેકિજનતાદૃતઃ ॥ ૧૨૬॥

વિદિતાત્મા વિધેયાત્મા વિસ્મિતેશાદિવીક્ષિતઃ ।
વિરૂપાક્ષગુહાવાસી વિશ્વાત્મા વિશ્વભુગ્વિભુઃ ॥ ૧૨૭॥

વિવિક્તસેવી વિઘ્નેશચૈત્યપ્રાકારસંસ્થિતઃ ।
વિધ્યદૃષ્ટમહોદર્શી વિજ્ઞાનાનન્દસુન્દરઃ ॥ ૧૨૮॥

વિઘસાશી વિશુદ્ધાત્મા વિપર્યાસનિરાસકઃ ।
વિભૂતિસિતફાલાઢ્યો વિરોધોક્તિવિનાકૃતઃ ॥ ૧૨૯॥

વિશ્વમ્ભરો વિશ્વવૈદ્યો વિશ્વાસ્યો વિસ્મયાન્વિતઃ ।
વીણાગેયો વીતમાયો વીર્યવાન્વીતસંશયઃ ॥ ૧૩૦॥

વૃદ્ધિહ્રાસવિનાભૂતો વૃદ્ધો વૃત્તિનિરોધકઃ ।
વૃત્તિદો વૃત્તિબોધેદ્ધો વેણુવાદ્યવશંવદઃ ॥ ૧૩૧॥

વેદવેદાન્તતત્ત્વજ્ઞો વેષદોષપ્રકાશકઃ ।
વ્યક્તાવ્યક્તસ્વરૂપજ્ઞો વ્યઙ્ગ્યવાક્યપ્રયોગવિત્ ॥ ૧૩૨॥

વ્યાપ્તાખિલો વ્યવસ્થાકૃદ્વ્યવસાયવિબોધકઃ ।
વૈજ્ઞાનિકાગ્રણીર્વૈશ્વાનરો વ્યાઘ્રાજિનસ્થિતઃ ॥ ૧૩૩॥

શરણ્યશ્શર્મદશ્શક્તિ પાતબુદ્ધશ્શમાન્વિતઃ ।
શરીરિવદ્ભાસમાનશ્શર્મણ્યજનવન્દિતઃ ॥ ૧૩૪॥ નામ ૭૫૦

શાસ્ત્રજાલમહારણ્ય વૃથાટનનિષેધકઃ ।
શાસ્ત્રાભ્યાસફલીભૂત જ્ઞાનવિજ્ઞાનતત્પરઃ ॥ ૧૩૫॥

શાસ્ત્રોલ્લઙ્ઘનવિદ્વેષી શાસ્ત્રમાર્ગાવિલઙ્ઘનઃ ।
શાન્તાત્મા શાન્તિદશ્શાન્તિધનશ્શાન્તોપદેશકઃ ॥ ૧૩૬॥

શાણ્ડિલ્યોપાસ્તિલક્ષ્યાર્થશ્શાસ્ત્રયોનિઃ પ્રજાપતિઃ ।
શિવઙ્કરશ્શિવતમશ્શિષ્ટેષ્ટશ્શિષ્ટપૂજિતઃ ॥ ૧૩૭॥

શિવપ્રકાશસન્તુષ્ટશ્શિવાદ્વૈતપ્રતિષ્ઠિતઃ ।
શિવગઙ્ગાતડાકસ્થશ્શિવજ્ઞાનપ્રદાયકઃ ॥ ૧૩૮॥

શીતાચલપ્રાન્ત્યપૂજ્યશ્શીપ્રાતીરજનાશ્રયઃ ।
શુભાશુભપરિત્યાગી શુભાશુભવિમત્સરઃ ॥ ૧૩૯॥

શુક્લકૃષ્ણગતિજ્ઞાની શુભંયુશ્શિશિરાત્મકઃ ।
શુકવજ્જન્મસંસિદ્ધશ્શેષાદ્રિસ્વામિવત્સલઃ ॥ ૧૪૦॥

શૈવવૈષ્ણવશાક્તાદિ વિરોધપ્રતિરોધકઃ ।
શૃઙ્ગારાદિરસાલમ્બો શૃઙ્ગારરસવિપ્રિયઃ ॥ ૧૪૧॥

શ્રવણાધ્યર્થતત્ત્વજ્ઞશ્શ્રવણાનન્દભાષિતઃ ।
શોણેશાલયસઞ્ચારી શોણેશઃ શોણતીર્થવિત્ ॥ ૧૪૨॥

શોકમોહાદ્યસંસ્પૃષ્ટશ્શોણક્ષેત્રાધિદૈવતમ્ ।
શ્રીદઃ શ્રીશઃ શ્રીનિવાસઃ શ્રીકણ્ઠમતતત્ત્વવિત્ ॥ ૧૪૩॥

શ્રીવિદ્યામન્ત્રતત્ત્વજ્ઞઃ શ્રીવૈષ્ણવમતપ્રિયઃ ।
શ્રુતિતાત્પર્યનિર્વક્તા શ્રુતમાત્રાવધારણઃ ॥ ૧૪૪॥

શ્રુતશ્રોતવ્યસન્તુષ્ટઃ શ્રૌતમાર્ગસમર્થકઃ ।
ષડધ્વધ્વાન્તવિધ્વંસી ષડૂર્મિભયભઞ્જનઃ ॥ ૧૪૫॥ નામ ૮૦૦
ષટ્ગ્રન્થિભેદચતુરષ્ષટ્ગુણી ષટ્પ્રમાણવાન્ ।
ષટ્કોણમધ્યનિલયષ્ષડરિઘ્નષ્ષડાશ્રયઃ ॥ ૧૪૬॥

ષણ્ડત્વઘ્નષ્ષડાધારનિર્ધ્યાતષ્ષડનાદિવિત્ ।
સર્વજ્ઞસ્સર્વવિત્સર્વસ્સાર્વસ્સર્વમનસ્સ્થિતઃ ॥ ૧૪૭॥

સદસન્નિર્ણયજ્ઞાની સર્વભૂતસમાશયઃ ।

સર્વશ્રુતિસ્સર્વચક્ષુસ્સર્વાનનકરાદિમાન્ ॥ ૧૪૮॥

સર્વેન્દ્રિયગુણાભાસસ્સર્વસમ્બન્ધવર્જિતઃ ।
સર્વભૃત્સર્વકૃત્સર્વહરસ્સર્વહિતેરતઃ ॥ ૧૪૯॥

સર્વારમ્ભપરિત્યાગી સગુણધ્યાયિતારકઃ ।
સર્વભૂતનિશાબુદ્ધસ્સર્વજાગરનિદ્રિતઃ ॥ ૧૫૦॥

સર્વાશ્ચર્યમસ્સભ્યસ્સઙ્કલ્પઘ્નસ્સદાતનઃ ।
સર્ગાદિમધ્યનિધનસ્સકૃત્સ્મૃતિવિમુક્તિદઃ ॥ ૧૫૧॥

સંયમી સત્યસન્ધશ્ચ સંસ્કારપરિવર્જિતઃ ।
સમસ્સમવિભક્તાઙ્ગસ્સમદૃક્ સમસંસ્થિતઃ ॥ ૧૫૨॥

સમર્થસ્સમરદ્વેષી સમર્યાદસ્સમાહિતઃ ।
સમયજ્ઞસ્સદાનન્દસ્સમાહૃતનિજેન્દ્રિયઃ ॥ ૧૫૩॥

સત્તાસંવિન્મયજ્યોતિસ્સમ્પ્રદાયપ્રવર્તકઃ । નામ ૮૫૦
સમસ્તવૃત્તિમૂલાહં વૃત્તિનાશોપદેશકઃ ॥ ૧૫૪॥

સમ્રાટ્ સમૃદ્ધસ્સમ્બુદ્ધસ્સર્વશ્રુતિમનોહરઃ ।
સરલસ્સરસસ્સર્વરસસ્સર્વાનુભૂતિયુક્ ॥ ૧૫૫॥

સર્વેશ્વરસ્સર્વનિધિસ્સર્વાત્મા સર્વસાધકઃ ।
સહજપ્રાપ્તકર્માનુષ્ઠાનત્યાગનિષેધકઃ ॥ ૧૫૬॥

સહિષ્ણુસ્સાત્ત્વિકાહારસ્સાત્ત્વિકજ્ઞાનિવીક્ષિતઃ ।
સત્ત્વાધિકમનોબુદ્ધિસુખધૈર્યવિવર્ધકઃ ॥ ૧૫૭॥

સાત્ત્વિકત્યાગયોગજ્ઞસ્સાત્ત્વિકારાધ્યવૈભવઃ ।
સાર્ધષોડશવર્ષાપ્તપારિવ્રાજ્યો વિરક્તધીઃ ॥ ૧૫૮॥

સામગાનપ્રિયસ્સામ્યવૈષમ્યમતિકૃન્તનઃ ।
સાધિતાખિલસિદ્ધીશસ્સામવિત્સામગાયનઃ ॥ ૧૫૯॥

સિદ્ધાર્થસ્સિદ્ધસઙ્કલ્પસ્સિદ્ધિદસ્સિદ્ધસાધનઃ ।
સિદ્ધ્યસિદ્ધિસમસ્સિદ્ધસ્સિદ્ધસઙ્ઘસમર્ચિતઃ ॥ ૧૬૦॥

સિસાધયિષુલોકેઽયસ્સહાયામ્બાસહાયવાન્ ।
સુન્દરસ્સુન્દરક્ષેત્ર વિદ્યાભ્યાસવિલાસભૃત્ ॥ ૧૬૧॥

સુન્દરેશ્વરલીલાકૃત્ સુન્દરાનન્દવર્દ્ધનઃ ।
સુરર્ષિસન્નુતસ્સૂક્ષ્મસ્સૂરિદૃશ્યપદસ્થિતઃ ॥ ૧૬૨॥

સુદર્શનસ્સુહૃત્સૂરિસ્સૂનૃતોક્તિવદાવદઃ ।
સૂત્રવિત્સૂત્રકૃત્સૂત્રં સૃષ્ટિવૈતથ્યબોધકઃ ॥ ૧૬૩॥ નામ ૯૦૦
સૃષ્ટિવાક્યમહાવાક્યૈક્યકણ્ઠ્યપ્રતિપાદકઃ ।
સૃષ્ટિહેતુમનોનાશી સૃષ્ટ્યધિષ્ઠાનનિષ્ઠિતઃ ॥ ૧૬૪॥

સ્રક્ચન્દનાદિવિષયવિરાગી સ્વજનપ્રિયઃ ।
સેવાનમ્રસ્વભક્તૌઘ સદ્યોમુક્તિપ્રદાયકઃ ॥ ૧૬૫॥

સોમસૂર્યાગ્ન્યપ્રકાશ્ય સ્વપ્રકાશસ્વરૂપદૃક્ ।
સૌન્દર્યામ્બાતપસ્સમ્પત્પરીપાકફલાયિતઃ ॥ ૧૬૬॥

સૌહિત્યવિમુખસ્સ્કન્દાશ્રમવાસકુતૂહલી ।
સ્કન્દાલયતપોનિષ્ઠસ્સ્તવ્યસ્તાવકવર્જિતઃ ॥ ૧૬૭॥

સહસ્રસ્તમ્ભસંયુક્ત મણ્ડપાન્તરમાશ્રિતઃ ।
સ્તૈન્યસ્તેનસ્સ્તોત્રશાસ્ત્ર ગેયસ્સ્મૃતિકરસ્સ્મૃતિઃ ॥ ૧૬૮॥

સામરસ્યવિધાનજ્ઞસ્સઙ્ઘસૌભ્રાત્રબોધકઃ ।
સ્વભાવભદ્રો મધ્યસ્થસ્સ્ત્રીસન્ન્યાસવિધાયકઃ ॥ ૧૬૯॥

સ્તિમિતોદધિવજ્જ્ઞાનશક્તિપૂરિતવિગ્રહઃ ।
સ્વાત્મતત્ત્વસુખસ્ફૂર્તિતુન્દિલસ્વસ્વરૂપકઃ ॥ ૧૭૦॥

સ્વસ્વધર્મરતશ્લાઘી સ્વભૂસ્સ્વચ્છન્દચેષ્ટિતઃ ।
સ્વસ્વરૂપપરિજ્ઞાન પરામૃતપદસ્થિતઃ ॥ ૧૭૧॥

સ્વાધ્યાયજ્ઞાનયજ્ઞેજ્યસ્વતસ્સિદ્ધસ્વરૂપદૃક્ ।
સ્વસ્તિકૃત્સ્વસ્તિભુક્સ્વામી સ્વાપજાગ્રદ્વિવર્જિતઃ ॥ ૧૭૨॥

હન્તૃહન્તવ્યતાશૂન્ય શુદ્ધસ્વાત્મોપદેશકઃ ।
હસ્તપાદાદ્યસઙ્ગ્રાહ્યનિર્લિપ્તપરમાર્થદૃક્ ॥ ૧૭૩॥

હત્યાદિપાપશમનો હાનિવૃદ્ધિવિવર્જિતઃ ।
હિતકૃદ્દ્રૂણદેશીય જનવર્ણિતવૈભવઃ ॥ ૧૭૪॥

હૃદયબ્રહ્મતત્ત્વજ્ઞો હૃદયાન્વેષદેશનઃ ।
હૃદયસ્થો હૃદયાકાશસ્વરૂપી હૃદ્ગુહાશયઃ ॥ ૧૭૫॥

હાર્દાકાશાન્તરગત બાહ્યાકાશાદિવસ્તુદૃક્ ।
હૃદયસ્થાનતત્ત્વજ્ઞો હૃદહન્નાશપણ્ડિતઃ ॥ ૧૭૬॥ નામ ૯૫૦
હેયોપાદેયરહિતો હેમન્તર્તુકૃતોદયઃ ।
હરિબ્રહ્મેન્દ્રદુષ્પ્રાપસ્વારાજ્યોર્જિતશાસનઃ ॥ ૧૭૭॥

હતાસુરપ્રકૃતિકો હંસો હૃદ્યો હિરણ્મયઃ ।
હાર્દવિદ્યાફલીભૂતો હાર્દસન્તમસાપહઃ ॥ ૧૭૮॥

સેતુસ્સીમા સમુદ્રશ્ચ સમાભ્યધિકવર્જિતઃ ।
પુરાણઃ પુરુષઃ પૂર્ણોઽનન્તરૂપસ્સનાતનઃ ॥ ૧૭૯॥

જ્યોતિઃ પ્રકાશઃ પ્રથિતસ્સ્વયમ્ભાનઃ સ્વયમ્પ્રભુઃ ।
સત્યં જ્ઞાનં સુખં સ્વસ્થસ્સ્વાનુભૂઃ પરદૈવતમ્ ॥ ૧૮૦॥

મહર્ષિશ્ચ મહાગ્રાસો મહાત્મા ભગવાન્વશી ।
અહમર્થોઽપ્રમેયાત્મા તત્ત્વં નિર્વાણમુત્તમમ્ ॥ ૧૮૧॥

અનાખ્યવસ્તુ મુક્તાત્મા બન્ધમુક્તિવિવર્જિતઃ ।
અદૃશ્યો દૃશ્યનેતા ચ મૂલાચાર્યસ્સુખાસનઃ ॥ ૧૮૨॥

અન્તર્યામી પારશૂન્યો ભૂમા ભોજયિતા રસઃ । નામ ૧૦૦૦

ઉપસંહારઃ ।
કોઽહં માર્ગ ધનુષ્પાણિર્નાહં તત્ત્વસુદર્શનઃ ।
સોઽહં બોધ મહાશઙ્ખો ભગવાન્ રમણોઽવતુ ॥ ૧॥

ઇતિ ત્રિવારમ્
ઇતિ તે નામસહસ્રં રમણસ્ય મહાત્મનઃ ।
કથિતં કૃપયા દેવિ ગોપ્યાદ્ગોપ્યતરં મયા ॥ ૨॥

ય ઇદં નામસાહસ્રં ભક્ત્યા પઠતિ માનવઃ ।
તસ્ય મુક્તિરયત્નેન સિદ્ધ્યત્યેવ ન સંશયઃ ॥ ૩॥

વિદ્યાર્થી લભતે વિદ્યાં વિવાહાર્થી ગૃહી ભવેત્ ।
વૈરાગ્યકામો લભતે વૈરાગ્યં ભવતારકમ્ ॥ ૪॥

યેન યેન ચ યો યોઽર્થી સ સ તં તં સમશ્નુતે ।
સર્વ પાપવિનિર્મુક્તઃ પરં નિર્વાણમાપ્નુયાત્ ॥ ૫॥

દુર્દેશકાલોત્થદુરામયાર્તાઃ
   દૌર્ભાગ્યતાપત્રયસન્નિરુદ્ધાઃ ।
નરાઃ પઠન્તો રમણસ્ય નામ-
   સાહસ્રમીયુસ્સુખમસ્તદુઃખમ્ ॥ ૬॥

ઇતિ શ્રીગૌતમમહર્ષિપ્રોક્તં શ્રીરમણસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ।
         ॥ શુભમસ્તુ ॥

Composed by Jagadisha Sastri.
This is a Ramanashram Publication available at http://www.sriramanamaharshi.org
The Sanskrit text has been approved to be posted on sanskritdocuments.org
by permission of Sri V.S. Ramanan, President, Sri Ramanasramam.

Encoded and proofread by Sunder Hattangadi sunderh at hotmail.com

.. Shri Ramanamaharshi Sahasranama Stotra ..
Searchable pdf was typeset using XeTeXgenerateactualtext feature of XeLaTeX 0.99996
on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*